# 2020

## SANSKRIT — GENERAL

**Paper : SEC-A-1**

**(Basic Sanskrit)**

**Full Marks : 80**

*The figures in the margin indicate full marks.*
*Candidates are required to give their answers in their own words as far as practicable.*

**1.** (a) अधस्तनेषु ***द्वयोः*** संस्कृतभाषया देवनागरीलिप्या च अनुवादः कार्यः। 10×2

(i) One day a dog holding a piece of meat in his mouth was going along the path of the river-bank. Then having seen his own reflection fallen in the water of the river he thought within himself — "this another dog is going with a piece of meat." Thereafter, he fell into the water to take that piece of meat also out of greed and was carried away by the current of the river.

(ii) There was a king named Daśaratha in Ayodhyā. He had three wives and four sons. Rāmacandra was the eldest of the sons. To keep his father's promise he went to the forest with his wife Sītā and brother Lakṣmaṇa. When they left Ayodhyā, all the citizens got overwhelmed with grief and wept.

(iii) A man was going to his friend's house in a village. Coming to a crossing of two streets he could not decide the way. He asked an old man — "Do you know the village Haripur? If so, kindly direct." The old man replied, "Why do you look idle? You yourself will come to know after you have a few steps". The man did not answer and walked away.

(b) अधस्तनेषु ***द्वयोः*** मातृभाषया अनुवादः कार्यः। 10×2

(i) योऽस्य जगतोऽखिलं वस्तु सत्यमेव जहाति स सर्वैर्बहुमन्यते। असंशयम् अतीव कठिनं तु एतद्। बहवो जनाः प्रायेणैवं कर्तुं समीहन्ते परं त्वरितमेव विफला भवन्ति। अतो महाजना आदौ मनोजयमुपदिशन्ति। एतस्मिन् लक्ष्ये शिष्टं सुकरं भवति।

(ii) अहो दुर्दैवम्! कार्पण्यदोषात् पत्युर्मे बुद्धिविकारो जातः। अन्यथा कुक्कुरमुखात् पादुकाग्रहणाय धावति वा कश्चिदपि सुस्थः पुरुषः? कस्य पादुका शुना नीयते को जानाति? कर्ता कुक्कुरेण दष्टः सन् गृहे प्रत्यावर्तते। क्षरति रुधिरधारा पाददेशात्। अरे मन्थरे! त्वमत्र निश्चिन्ता तिष्ठसि! सत्वरं गच्छ वैद्यमाह्वय।

(iii) बुद्धिसागरं मुख्यामात्यं विधाय स्वराज्यं वुभुजे भोजनृपतिः। एवमतिक्रामति काले कदाचिद्राज्ञा कोऽपि धारानगरवासी विप्रो लक्षितः। स च राजानं वीक्ष्य नेत्रे निमिल्य गच्छन् राज्ञा पृष्टः– ''द्विज! त्वं मां दृष्ट्वा न स्वस्तीति जपसि, विशेषेण लोचने निमीलयसि। अत्र हेतुः कः?'' विप्र आह– ''देव! त्वं कस्मैचित् कदापि किमपि न प्रयच्छसि। तेन तव दाक्षिण्यमपि नास्ति। अतस्ते किमाशीर्वचसा?''

**2.** कश्चन ***एकतरम्*** अनुच्छेदं पठित्वा तदन्ते प्रदत्तानां प्रश्नानाम् उत्तरं संस्कृतभाषया देवनागरीलिप्या च देयम्। 10×1

(a) अस्ति कस्मिंश्चित् समुद्रोपकण्ठे महान् जम्बुपादपः सदाफलः। तत्र च रक्तमुखो नाम वानरः प्रतिवसति स्म। अथ कदाचित् तस्य तरोरधस्तात् करालमुखो नाम मकरः समुद्रसलिलान्निष्क्रम्य सुकोमलवालुकासनाथे तीरोपान्ते न्यविशत्। ततश्च रक्तमुखेन स प्रोक्तः – 'भोः! भवान् समभ्यागतो मेऽतिथिः। तद्भक्षयत मे दत्तानि अमृतकल्पानि जम्बुफलानि।' एवमुक्त्वा तस्मै जम्बुफलानि ददौ। सोऽपि तानि भक्षयित्वा तेन सह चिरं गोष्ठी-सुखमनुभूय भूयोऽपि स्वभवनं गतः। एवं नित्यमेव तौ वानरमकरौ जम्बुच्छायाश्रितौ विविधालापेन कालं नयन्तौ सुखेन तिष्ठतः।

(i) जम्बुपादपः कीदृशः? तत्र कः प्रतिवसति स्म? 1+1

(ii) वानरस्य नाम किम्? कश्च तस्य मित्रम्? 1+1

(iii) वानरेण कथं मकराय जम्बुफलानि प्रदत्तानि? 2

(iv) मकरः कुतः समागतः कुत्र च न्यविशत्? 1+1

(v) जम्बुफलानि खादित्वा मकरः किमकरोत्? 2

(b) अस्ति मन्दारपर्वते दुर्दान्तो नाम सिंहः। एकदा सर्वे पशवः मिलित्वा तस्य समीपं गत्वा उक्तवन्तश्च– ''किमिति भवान् यथेच्छं पशुं हन्ति। वयमेव तवाहारार्थं प्रत्यहम् एकैकं पशुमुपहरामः।'' सिंहेनोक्तं– ''तथैव भवतु।'' एकदा शशकस्य वारः समायातः। अवश्यं मरिष्यामि चेत् किं सिंहस्यानुनयेन? इति चिन्तयित्वा मन्दं चलितः। क्षुधार्तः सिंहः तमवदत्– ''विलम्बादागच्छसि कथम्।'' शशक उवाच– ''पथि अपरः सिंहः मां वलाद् धृतवान्। तस्य समीपे पुनरागमनाय शपथं कृत्वा अत्रागतः।'' सिंहेनोक्तम्– ''सत्वरं दर्शय क्व स दुष्टः तिष्ठति।'' सिंहेन सह शशकः कूपस्य समीपमागत्य कूपजले सिंहस्य प्रतिविम्बं दर्शयामास। अथ गर्जन् सिंह आत्मानं तस्मिन्निक्षिप्य पञ्चत्वं गतः।

(i) सिंहस्य नाम किम्? सः कुत्र प्रतिवसति स्म? 1+1

(ii) पशवः सिंहं किम् अवदन्? 2

(iii) शशकः कथं विलम्बादागतवान्? 2

(iv) सिंहेन पृष्ठः सन् शशकः किम् उक्तवान्? 2

(v) सिंहः कथं मृतोऽभवत्? 2

**3.** अधोलिखितयोः ***विषयमेकम***वलम्ब्य यथानिर्देशं पत्रं विरच्यताम्। 10×1

(a) महाविद्यालयस्य प्रवेशिकाशुल्कमुक्तये अध्यक्षं प्रति संस्कृतभाषया देवनागरीलिप्या च पत्रमेकं लिख्यताम्।

(b) परिवेशदूषणं, तत्प्रतिविधानानुरोधं च विज्ञाप्य स्वास्थ्यविभागस्य आधिकारिकं प्रति पत्रमेकं संस्कृतभाषया देवनागरीलिप्या च लिख्यताम्।

**4.** अधोलिखितेषु विषय**मेकमव**लम्ब्य न्यूनतया पञ्चाशदधिकाष्टशतशब्दैः संस्कृतभाषया देवनागरीलिप्या च प्रबन्धः विरच्यताम्। 20×1

(a) भारतवर्षस्याखण्डता।

(b) तव प्रियः कविः।

(c) वन्यप्राणिसंरक्षणम्।

———————